हि महतां पूज्यः सद्यो मोक्षमयो यतः। त्यागेन युक्ता दिवमुत्पतन्ति त्यागेन हीना नरकं व्रजन्ति। न त्यागिनां दुष्करमस्ति किञ्चित् त्यागो हि सर्वव्यसनानि हन्ति” शब्दार्थचि० धृतवाक्यम्।

**त्यागिन्** त्रि० त्यज–घिणुन्। १ दातरि, २शूरे, ३वर्ज्जनशीले, ४कर्मफलत्यागिनि च “न द्वेष्ट्यकुशलं कर्म कुशलेनानुषज्जते। त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः। न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते” गीता “आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया” मनुः।

**त्यागिमन्** त्रि० त्यागेन निष्पन्नं त्याग+इमन्। त्यागेन निर्वृत्ते।

**त्याज्य** त्रि० त्यज+ण्यत् कुत्वाभावः। १वर्ज्जनीये “तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः” प्रा० त०। २दातुं योग्ये च। “त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता” रघुः। “सा त्ववाप्यान्यतो गर्भं त्याज्या भवति पापिनी। महापातकदुष्टा च पतिगर्भविनाशिनी” व्यासस्मृ०।

**त्रक** गतौ भ्वा० आत्म०सक०सेट्। त्रकते अत्रकिष्ट। तत्रके।

**त्रख** गतौ भ्वा० पर० सक० सेट् धातुपाठः। त्रखति अत्रखीत् अत्राखीत्। तत्राख। [अत्रङ्खीत्। तत्रङ्ख।

**त्रख** गतौ भ्वा० पर० सक० सेट् इदित् धातुपाठः। त्रङ्खति

**त्रग** गतौ भ्वा० पर०सक० सेट् इदित्। त्रङ्गति अत्रङ्गीत्। तत्रङ्ग। अयं दिवा० धातुपाठः। त्रङ्ग्यति।

**त्रङ्ग** पुंस्त्री त्रगि–अच्। पुरभेदे हरिश्चन्द्रपुरे सौभे उद्गङ्गे प्रतिमार्गके त्रिका०।

**त्रद** चेष्टायां भ्वा० पर० अक० सेट् इदित्। त्रन्दति अत्रन्दीत्। तत्रन्द।

**त्रप** लज्जायां भ्वा०आ० अक० वेट्। त्रपते अत्रपिष्ट अत्रप्त त्रेपे। णिच् वा घ०। त्रपयति त्रापयति। षित् त्रपा। “कान्तया कान्तसंयोगे किमकारि नवोढ़या। अत्रापि च क्रिया प्रश्नोत्तरा गुप्ता न बुध्यते” विदग्धमुख०। “अपेक्षाभिक्षायामपि किमपि चेतस्त्रपयति” शान्तिश०। अप–अन्यतो लज्जायाम् “तस्माद्बलैरपत्रेपे” भट्टिः। “लज्जा सापत्रपान्यतः” अमरः।

**त्रपा** स्त्री त्रप–भावे अङ्। १लज्जायाम् अमरः। कर्त्तरि अच्। २सलज्जे त्रि०। ३कुलटायां स्त्री मेदि०। ४कुले ५कीर्त्तौ च शब्दच०।

**त्रपाक** पुंस्त्री० त्रप–आक। म्लेच्छजातिभेदे उणादि०।

**त्रपारण्डा** स्त्री त्रपायां रण्डा। लज्जाहीनायां वेश्यायां जटा० शब्दक० वस्तुतः त्रपारण्डेति नामद्वयं मेदिनौ त्रपाशब्दस्य वेश्यार्थकत्वोक्तेः रण्डाशब्दस्य च तदर्थप्रसिद्धेस्तत्समानार्थकत्वौचित्यात्।

**त्रपिष्ठ** त्रि० अतिशयेन तृप्रः अतिशायने इष्ठन् प्रियादि० त्रपादेशः। तृप्रतरे। [स्त्रियां ङीप्।

**त्रपीयस्** त्रि० अतिशयेन तृप्रः ईयसुन् त्रपादेशः। तृप्रतमे

**त्रपु** न० अग्निं दृष्ट्वा त्रपते लज्जते इव त्रप–उन्। १सीसके २रङ्गे च मेदि० तस्य विकारः अण् “त्रपुजतुनोः षुक् च” पा० षुक् च। त्रापुष तद्विकारे त्रि०। “ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च” मनुः। “सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु। ज्ञेयं त्रपुमलं सीसं सीसस्यापि मलं मलम्” भा०उ० ३८ अ०। [लताभेदे।

**त्रपुकर्कटी** स्त्री त्रपु इव शुभा कर्कटी। (ससा) इति ख्याते

**त्रपुटी** स्त्री त्रप–बा०-उटक् गौरा० ङीष्। सूक्ष्मैलायाम्। रत्नमाला।

**त्रपुल** न० त्रप–बा० उल। रङ्गे त्रिकाण्डकोषः।

**त्रपुष(स)** न० त्रपुष्याः(ष्याः)फलम् अण् फले तस्य लुप्। त्रपुषी(सी)फले। “त्रपुसं(षं) लघु नीलञ्च नवं तृट्क्लमदाहजित्। स्वादु पित्तापहं शीतं रक्तपित्तहरं परम्। तत्पक्वमम्लमुष्णं स्यात् पित्तलं कफवातनुत्। तद्बीजं मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित्” भावप्र०।

**त्रपु(ष)स** न० त्रप–बा० उस(ष)। १रङ्गे त्रिकाण्डकोषः। गौरा० ङीष् २माहेन्द्रवारुण्यां कर्कटीभेदे (ससा) लताभेदे। सा च पीतपीष्पा काण्डालुः बहुफला तुन्दिलफला कण्टकफला सुधावासा च।

**त्रप्सा** स्त्री घनीभूतश्लेष्मादौ। “कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी। त्रप्सया कर्षणैः क्षिप्ता वान्तैर्वा दुष्टतां व्रजेत्। नखदग्धतनूजत्वक्तुषपांशुरजोमलैः। भस्मपङ्कशवैर्वापि प्रच्छन्ना मलिना भवेत्” “त्रप्सा घनीभूतश्लेष्मादि” शु०त०।

**त्रप्स्य** न० घनेतरदधनि अमरटीकायां विद्याविनोदः।

**त्रय** न०स्त्री त्रयाणामवयवम् अयच्। त्रितये १त्रित्वसंख्यायाम् “वेदत्रयं निरदुहत् भूर्भुवः स्वरितीति च” मनुः। स्त्रीत्वपक्षे ङीप्। “व्याप्तोतिष्ट सभावेद्यामसौ नरशिखित्रयी” माघः त्रयोऽवयवा अस्य अयच्। २त्रित्वसंख्यान्विते त्रि० स्त्रियां ङीप्। “प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्। त्रयं सुविदितं कार्य्यं धर्म-